विषय - व्याकरण
पेज - 13
- 32.5×13×0.3 c.m.

श्रीमते रामानुजायनमः लट् लिट् लुट्लृट्लेट्

... ...

क्रियते तस्य ङवर्गोंतादेशः पदांते त्रहात्विक् त्रहत्विकौ त्रहात्विजः

विषय - व्याकरण
पेज - 13
- 32.5×13×0.3 c.m.

श्रीमते रामानुजायनमः लट् लिट् लुट्लृट्लेट्

... ...

क्रियते तस्य ड्वर्गौतादेश। पदांते प्रष्ठाविड्
प्रष्ठविड़ौ प्रष्ठाविड:

श्रीमते रामानुजाय नमः लट् लिट् लुट् लृट् लेट् लोट् लङ्. लिङ्. लुङ्. लृङ्. एषु पंचमो
लकारश्छंदोमात्रगोचरः लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि कर्तरि
च स्युरकर्मकेभ्यो भावे कर्तरि च वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात् अटावितौ
उच्चारणसामर्थ्याल्लस्य नेत्वं भू सत्तायां कर्तृविवक्षायां भू ल इति स्थिते तिप्तस्झिसिप्थ
स्थ मिब्वस्मस्तातांझथासाथांध्वमिड्.वहि.महिङ्. एते ष्टादश लादेशाः स्युः लः परस्मैपदं ला
देशाः परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ्.प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसं
ज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित् तदंताच्च धातोर्लस्थाने आ
त्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञितश्च धातोरात्मनेपदं कर्तृ
गामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैप
दं स्यात् तिङ्.स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ्.उभयोः पदयोस्त्रयस्त्रिकाः क्रमादे
तत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानि तिङ्. स्त्रीणि

वे

१

२७ अस्तृत अस्तरीत गुणोर्तिसंयोगाद्योः अर्तेः संयोगादेर्ऋदन्तस्य गुणो यकि यादावार्धधातुके लि
ङि च स्तर्यात् अस्तार्षीत् अस्तार्ष्टां अस्तरिष्यत् षुञ् अभिषवे षुवः षस्य सुवः स आदेशः स्वादिभ्यः
श्नुः कर्तरि सार्वधातुके शपोपवादः सुनोति सार्वधातुकमपित् अपित् सार्वधातुकं ङित् तस्मात् सुनु
तः सुनुतः हुश्नुवोः सार्वधातुके हुश्नुवोरनेकाचोऽसंयोगपूर्वो वर्णस्य यण् स्यात् अचि सार्वधातुके सु
न्वंति सुनोषि सुनुथः सुनुथ सुनोमि लोपश्चास्यान्यतरस्यां म्वोः असंयोगपूर्वस्य प्रत्ययोकारस्य
लोपो वा म्वोः परयोः सुन्वः सुनुवः सुन्मः सुनुमः सुषाव सुषुवतुः सुषुवुः सुषोथ सुषुवथुः
सुषुव सुषाव सुषव सुषुविव सुषुविम सोता सोष्यति सुनोतु सुनुतात् सुनुतां सुन्वंतु उतश्च प्रत्य
यादसंयोगपूर्वात् असंयोगपूर्वो यस्तस्मात् हेर्लुक् सुनु सुनुतात् सुनुतं सुनुत गुणावादेशौ
सुनवानि सुनवाव सुनवाम असुनोत् असुनुतां असुन्वन् असुनोः असुनुतं अ
सुनुत असुनवं असुन्व असुनुव असुन्म असुनुम सुनुयात् सुनुयातां सुनुयुः
सुनुयाः सुनुयातं सुनुयात सुनुयां सुनुयाव सुनुयाम सूयात् असावीत् असोष्यत् गम्

पः स्परित्संज्ञकः धादेशश्च स्यात् पिबादेशोऽदन्तस्तेन न गुणः । पिबति आत औ णलः पपौ आ
तो लोप इटि च अजाद्यार्धधातुके क्ङिति । पपतुः पपुः पपिथ पपाथ
पपथुः पप पपौ पपिव पपिम पाता पास्यति पिबतु अपिबत् पिबेत् एर्लिङि घुसंज्ञकानां मास्था
गापिबतिजहातिस्यतीनामस्य सत्यार्धधातुके लिङि क्ङिति पेयात् गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु लुक् अपा
त् अपाताम् आतः सिज्लुकि आदन्तादेव झेर्जुस् उस्यपदान्तात् अपुः तादृकारादृसिपर
रूपमेकदेशः अः अपास्यत् ग्लै म्लै हर्षक्षये ग्लायति आदेच उपदेशेऽशिति उपदेशे
जन्तस्य धातोरात्वं न तु शिति जग्लौ ग्लाता ग्लास्यति ग्लायतु अग्लायत् ग्लायेत् वान्यस्य संयो
गादेः एत्वं वार्धधातुके किति लिङि ग्लेयात् ग्लायात् यमरमनमातां सक् च एषां स
ज्यस्य सिचि परस्मैपदेषु अग्लासीत् अग्लास्यत् ह्वृ कौटिल्ये ह्वरति ऋतश्च संयोगादेर्गु
णः ऋदन्तस्य संयोगादेरङ्गस्य गुणो लिटि पक्षान्तरे हि जह्वार जह्वरतुः जह्वरुः जह्वर्थ जह्वरथुः
जह्वर जह्वार जह्वर जह्वरिव जह्वरिम ह्वर्ता ऋद्धनोः स्ये ऋतो हन्ते स्य इडागमः स्यात् ह्वरिष्यति ह्व
र्यात् स्यादिरस्य संयोगादे

गौ

रद्यजस्य तासोनित्यानिट् अदंतादेवधलोनेडारद्वजस्यश्रतेत्तेनास्यस्यस्यादेव अजन्तोकारवा
न्यायस्तास्यनिट् पालिवेडयम् अदेत्तइहिङ्ग्त्वानि खानि ट क्राघ्नोत्तिटिसेडवेत् चिक्षपि
प चिक्षेप चिक्षिपथुः चिक्षिप चिक्षाप चिक्षिव चिक्षिपिव चिक्षिपिम क्षेता क्षेप्स्यति क्षिपतु
अक्षिपत् क्षिपेत् अक्षैप्सीत् क्षेपेपानके धातकयोर्दीर्घः अजंतांगस्यदीर्घोपादौ प्रत्यये नत्र हस्तावधा
तुकयोः लीयात् सिचिवृद्धिः परस्मैपदेषु इगंतांगस्यवृद्धिः परस्मैपदे सिचि अक्षैप्सीत् अक्षेप्स्य
त् तप संतापे तपति ततापा तेपतुः तेपतुः तेपुः तेपिथ ततप्थ तप्ता तप्स्यति तपतु अत
पत् तपेत् तप्यात् अताप्सीत् अताप्तां अतप्स्यत् क्रमु पादविक्षेपे वा भ्राश भ्लाश भ्र
मु क्रमु क्लमु त्रसि त्रुटि लषः एभ्यः श्यन्वा कर्तरि सार्वधातुके परे शप् क्रमः परस्मैपदेषु क्रमो दी
र्घः परस्मैपदे शिति क्राम्यति क्रामति चक्राम चक्रमिता क्रमिष्यति क्राम्यतु क्रामतु अक्राम्य
त् अक्रामत् क्राम्येत् क्रामेत् क्रम्यात् अक्रमीत् अक्रमिष्यत् पा पाने पाघ्राध्मास्थाम्ना
दाण्दृश्यर्तिसर्तिशदसदां पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीदाः पादीनांपिबाद

दह दिह उह तुह मिह रुह लिह वहो ह्रौ अनुदात्ता हलन्तेषु धातवस्त्रयस्त्रिंशत्तं गोपायाँचकार

गोपायाँचक्रतुः गोपायाँचक्रुः गोपायाँचकर्थ गोपायाँचकार गोपायाँचकर गोपायाँचकृव गोपायाँचकृम

गोपायाँबभूव गोपायामास जुगोप जुगुपतुः जुगुपुः स्वरति सूति सूयति धूञ् दितो वा स्व

कृसे रत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्य इड्वा जुगोपिथ जुगोप्थ गोपायिता गोपिता गोप्ता गोपा

यिष्यति गोपिष्यति गोप्स्यति गोपायतु अगोपायत् गोपायेत् गोपाय्यात् गुप्यात् अगो

उा पायीत् नेटि इडादौ सिचि हलन्तस्य वृद्धिर्न अगोपीत् अगौप्सीत् झलो झलि झलः परस्य

सस्य लोपो झलि अगोप्तां अगोप्सुः अगोप्सीः अगोप्तं अगोप्त अगोप्सं अगोप्स्व अ

गोप्स्म अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत् क्षि क्षये क्षयति चिक्षाय चिक्षियतुः चि

क्षियुः एकाच इति निषेधे प्राप्ते कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि क्रादिभ्य एव लिट इण्न तस्मा

दन्यस्मादनिटोपि स्यात् अचस्तास्वत्थल्यनिटो नित्यं उपदेशेऽजन्तो यो धातुस्तासौ नित्यानि

ट्ततस्थल इण्न उपदेशेत्वतः उपदेशे कारवतस्तासौ नित्यानिटः परस्य थल इण्न ऋतो भा

ज्ञतः

7

रस्मलक् हल्ल्यानुप्रयुज्यते लिटि आमंतान्निरूपरा: कृभ्वस्तयोनुप्रयुज्यंते ते चांहिताविन्तरत
अभ्यासकातोत प्रत्ययेहाचि: णोपायांचकार ह्रित्वा त्परत्वाद्यलिप्राप्ते द्विर्वचनेचि हित्व निमित्तेचि
अचआदेशोनद्वित्वेकर्तव्ये णोपायांचक्रतुः णोपायांचक्रु: णोपायांचकृ: एकाचउपदेशेनुदा
त्तात् उपदेशेयोधातुरेकाच् अनुदात्तश्च तस्य: आर्धधातुकस्य इट् न उदाहृतैर्योति लक्षणंशीलन्तु
ऽ अ्चिरांश्निरि: तुइ. अन्यस्मान् विनैकादचस्तेषु निहिता: स्मृता: कांतेषु श्लोकः चांतेषु पच मुच
रिच् वच् विच् सिच्: प्रच्छितेषु प्रच्छ: एक: जांतेषु त्यज् निजि भज् भंज् भुज् भ्रस्ज् मस्ज् यज् यु
ज् रुज् रंज् विजिर् स्वंज् संज् सृज: पंचदश दांतेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद्य भि
द् विद्य विनद् विंद् शद् सद् स्विद्य स्कंद् हद्: षोडश धांतेषु क्रुध क्षुध बुध्य बंध युध् रुध् राध्
व्यध् शुध् साध् सिध्य एकादश नांतेषु मन्य हन् नौ द्वौ पांतेषु आप् छुप् क्षिप् तप् तिप् तृप्
दृप्य लिप् लुप् वप् शप् स्वप् सृप् त्रयोदश भांतेषु यभ् रभ् लभ् त्रय: मांतेषु गम् नम् यम् र
म् चत्वारः शांतेषु क्रुश दंश दिश दृश मृश रिश रुश लिश विश स्पृश: दश षांतेषु कृ
ष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्य एकादश सांतेषु घस् वस् द्वौ हांतेषु

नंदिता नंदिष्यति नंदतु अनंदत् नंदेत् इति त्वान्त्यलोपे न नंद्यात् अनंदीत् अनंदीष्यत् अर्च
पूजायां अर्चति तस्मान्नुट् द्विहलः द्विहलो धातोर्दीर्घीभूतात् अतः परस्य नुट् स्यात् आनर्च आनर्चतुः
अर्चिता अर्चिष्यति अर्चतु आर्चत् अर्चेत् अर्च्यात् आर्चीत् आर्चिष्यत् व्रज गतौ व्रजति व
व्राज व्रजिता व्रजिष्यति व्रजतु अव्रजत् व्रजेत् व्रज्यात् वदव्रजहलंतस्याचः एषामचो वृद्धिः सिचि
परस्मैपदेषु अव्राजीत् अव्रजिष्यत् कटे वर्षावरणयोः कटति चकाट कटिता कटिष्यति कटतु
अकटत् कटेत् कट्यात् ह्म्यंतक्षणश्वसजागृणिश्व्येदितां ह्मयांतस्य क्षणादेर्ण्यंतस्य श्वयतेरेदि
तश्च वृद्धिर्नेडादौ सिचि अकटीत् अकटिष्यत् गुपू रक्षणे गुपूधूपविच्छिपणिपनिभ्य आयः
स्वार्थे सनाद्यंता धातवः सनादयः कमेर्णिङ् अंताः प्रत्यया अंते येषां ते धातुसंज्ञकाः सन्क्यच्काम्यच् ते
प क्यच् क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः इति सनाद्यंता धात
वस्तासां ततो भ्वादयः इत्येतत्सूत्रपिंडकं धातवः सनादयः गोपायति आयादय आर्द्धधातुके
वा आर्द्धधातुकविवक्षायामायप्रत्ययो वा स्यात् कास्प्रत्ययादाममंत्रे लिटि कास आम् विधाना
मस्यनेत्वं अतो लोपः आर्धधातुकोपदेशे यदंतं तस्यातो लोपः आर्धधातुके आमः आमः प

षेत् सिध्यात् असेधीत् असेधिष्यत् एवं षिधौ संज्ञाने शुच शोके गद व्यक्तायां वाचि गदति नेर्गदनद
पदपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च उपसर्गस्थान्निमि
त्तात्परस्य नेर्णः स्यात् गदादिषु परेषु प्रणिगदति कुहोश्चुः अभ्यासस्य कवर्गहकारयोश्चवर्गादेशः अत उपधायाः
वृद्धिः स्यात् ञिति णिति च प्रत्यये जगाद जगदतुः जगदुः जगदिथ जगदथुः जगद णलुत्तमो वा णित्स्या
त् जगद जगाद जगदिव जगदिम गदिता गदिष्यति गदतु अगदत् गदेत् गद्यात् अतो हलादेर्लघोः
हलादेर्लघोरतो वृद्धिर्वा इडादौ सिचि परस्मैपदे अगादीत् अगदीत् अगदिष्यत् णद अव्यक्ते शब्दे णोनः
धात्वादेः णस्य नः नदति णोपदेशास्त्वनर्द्दनाटिनाथ्नाधनन्दनक्कनॄनृतः उपसर्गात्समासेपि णोपदेशस्य
उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः [?] प्रणिनदति ननाद अत एकहल्मध्ये
ऽनादेशादेर्लिटि लिट्निमित्तादेशादिकं न भवति तदंगं तद्व्यवस्यासंयुक्तहल्मध्यस्थस्यात एत्वमभ्यास
लोपश्च किति लिटि नेदतुः नेदुः थलि च सेटि इट्युत्ति[?] लिटि च प्रागुक्तं स्यात् नेदिथ नेदथुः नेद ननाद
ननद नेदिव नेदिम नदिता नदिष्यति नदतु अनदत् नदेत् नद्यात् अनादीत् अनदीत् अन
दिष्यत् टुनदि समृद्धौ आदिर्ञिटुडवः उपदेशे धातोराद्या एते इतः स्युः इदितो नुम् धातोः नंदति ननंद

मं॰त्रा॰ ङितोलस्य परस्मैपदमिकारांतं यत्तस्य लोपः अभवत् अभवतां अभवन् अभवः अभवतं अभवत
अभवं अभवाव अभवाम विधिनिमंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु धातोर्लिङ् यासुट् परस्मै
पदेषूदात्तो ङिच्च लिङः परस्मैपदानां यासुडागमः उदात्तो ङिच्च लिङः सलोपोनंतस्य सार्वधातुकलिङोनंत्य
स सस्य लोपः इति प्राप्ते अतो येयः अतः परस्य सार्वधातुकावयवस्य यास इत्यस्य इय् स्यात् लोपो व्योर्व
लि भवेत् भवेतां झेर्जुस् लिङः भवेयुः भवेः भवेतं भवेत भवेयं भवेव भवेम लिङाशिषि आशि
षि लिङ् स्तिङार्द्धधातुकसंज्ञः किदाशिषि आशिषि लिङो यासुट् कित्स्यात् क्ङिति च विरमितङिति
मित्ते इलत्त ऐगुणवृद्धी नस्तः स्कोरिति सलोपः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भू
यासं भूयास्व भूयास्म लुङ् भूतार्थे धातोर्लुङ् माङि लुङ् सर्वलकारापवादः स्मोत्तरे लङ् स्मोत्तरे माङि
लङ् स्यात् च च्लि लुङि शवाद्यपवादः च्लेः सिच् गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु लुक् गापावि
३ हेलादेशः पिबतिस्तग्रहणं भूसुवोस्तिङि भूसु एतयोः सार्वधातुके ङिति गुणो न अभूत् अभूतां अभू
वन् अभूः अभूतं अभूत अभूवं अभूव अभूम न माङ्योगे अडाटौ न स्तः मा भवान् भूत् मा स्म भू
भूत् मा स्म भवत् लिङ्निमित्ते लृङ् क्रियातिपत्तौ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यदर्थे च धा

त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः
उर्द्ध्व कारकवाचिनि युष्मद्यप्रयुज्यमाने प्रयुज्यमाने च मध्यमः अस्मद्युत्तमः तथा भूते स्मद्युत्त
शेषे प्रथमः भूतिइतिस्थिते तिङ्शित्सार्वधातुकं तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः
कर्तरि शप् कर्त्रर्थे सार्वधातुके परे धातोः शप् शपावितौ सार्वधातुकार्द्धधातुकयोः अनयोः
परयोरिगंतांगस्य गुणः अवादेशः भवति भवतः ऊतिः प्रस्यपावपवस्य जस्यांतादेशः अतो
गुणे भवंति भवसि भवथः भवथ अतोदीर्घोयञि अतोंगस्य दीर्घो यञादौ सार्वधातुके
भवामि भवावः भवामः सः भवति तौ भवतः ते भवंति त्वं भवसि युवां भवथः यूयं भवथ
अहं भवामि आवां भवावः वयं भवामः शेषे विभाषाकखादावषांत उपदेशे उपदेशका
द्दिरवादिषांतवर्जे गदनदादेरन्यस्मिन्धातावुपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात् प्रणि
भवति प्रनिभवति परोक्षे लिट् भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् लस्य तिवादः

परस्मैपदानां णलतुसुस्थलथुसणल्वमा: लिट लिबादीनां णलादय: स्यु: भू अ इति स्थिते
वोवुग लुङ्लिटो: अचि लिटि धातोरनभ्यासस्य लिटि परे ऽनभ्यासस्य धात्ववयवस्यैकाच: प्रथम
स्य द्वे स्त: आदिभूतादच: परस्य तु द्वितीयस्य भूव् भूव् अ इति स्थिते पूर्वोऽभ्यास: अत्र ये द्वे तयो: ह
लादि: शेष: अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते ह्रस्व: अभ्यासस्याच: भवतेर: भवते
रभ्यासोकारस्य अ: स्याल्लिटि अभ्यासे चर्च अभ्यासे झलां चर: स्युर्जशश्च झशां जश: खयां च
र इति विवेक: बभूव बभूवतु: बभूवु: लिङ् लिडादेश तिङार्द्धधातुकसंज्ञा: स्यु: आर्द्धधातुक
स्येड्वलादे: वलादेरार्द्धधातुकस्येडागम: बभूविथ बभूवथु: बभूव बभूविव बभूविम अ
नद्यतने लुट् भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यतासी लृलुटो: धातोरेतौ स्त: लृलुटो: परत:
शबाद्यपवाद: लृ इति लृङ्लृटोर्ग्रहणं आर्द्धधातुकं शेष: तिङ्शिद्भ्यो धातोरिति विहित: प्र
यातत्संज्ञा: इट् लुट: प्रथमस्य डारौरस: डित्वसामर्थ्यादभस्यापि टेर्लोप: भविता तासस्त्योर्लो
रुपीवैरीनाम दयावेग्नोरिह्य गुणदे

अधे स्मात्स्वारम् जीवसे पिबध्यै क्त्वातोसुन्कसुन, तसतस्तमथ्यान्कृत्वो उपेतो विस्मः प

~~तस्मात्सर्वविभक्तिः यस्मात्सर्वा विभक्तिर्नैव घते लुक्~~ अतः च्वादिरप्याकृतिगणः तद्धितश्चास-
र्वविभक्तिः यस्मात्सर्वा विभक्तिर्नैव घते स तद्धितान्तो अव्ययसंज्ञास्यात् परिगणनं कर्तव्यम् तसिला-
दयः प्राक् पाशपः शस्प्रभृतयः प्राक् समासान्तेभ्यः अम् आम् सती वती नाना ञा विति कृ-
त्वादिर्हि तमेजंतः क्त्वातोसुन्कसुनः तज्जेतश्च तदंत मव्ययीभावश्च अपि हरि अव्ययादाप्सुपः अ-
व्ययाद्वितस्यायः सुपश्च लुक् स्यात् तत्र शालायां अ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्ति-
षु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलं-
तानां यथा वाचा निशा दिशा वगाहः अवगाहः इत्यव्ययानि इति वरदराजविरचितायां लघु-
सिद्धांतकौमुद्यां प्रथमा वृत्तिः समाप्ता लट् लिट् लुट् लृट् लेट् लोट् लङ् लि-
ङ् लुङ् लृङ् एषु पंचमो लकारश्छंदोमात्रगोचरः लः कर्मणि च भावे चाकर्मकेभ्यः लका-
राः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च वर्तमाने लट् वर्तमानक्रिया-
वृत्तेर्धातोर्लट् स्यात् अटावितौ उच्चारणसामर्थ्याल्लस्य नेत्त्वं भूसत्तायां कर्तृविवक्षायां प-

र उत्वमत्वे अदन्ति शेषं ठंवत् इति हलंतान् उंसकलिंगा स्वरादिनिपातमव्ययम् ॥११३॥ स्वर् अंत
र् प्रातर् पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् पृथक् ह्यस् श्वस् दिवा रा
त्रौ सायम् चिरम् मनाक् ईषत् जोषम् तूष्णीम् बहिस् अवस् समया निकषा स्वयम् वृथा न
क्तम् नञ् हेतौ अद्धा इद्धा सामि वत् ब्राह्मणवत् क्षत्रियवत् उपधा सना सनात् तिरस् अं
तरा विहायसा दोषा मिथ्या मृषा पुधा उरा मिथस् प्रायस् मुहुस् प्रवाहिका आर्यहलम् अभी
क्ष्णम् साकम् सार्धम् नमस् हिरुक् धिक् अथ अथो अम् आम् प्रताम् प्रशान् मा माङ् आ
कृतिगणोयम् च वा ह अह एव एवम् नूनम् शश्वत् युगपत् भूयस् कूपत् सूपत् कुवित् ने
त् चेत् चण् कच्चित् नह हंत नकिम् माकिम् माङ् नञ् यावत् तावत् त्वै द्वै रै श्रौषट् वौषट् स्वा
हा स्वधा वषट् तुम् तथाहि खलु किल अथो सुष्ठु स्म आदह उपसर्गविभक्तिस्वरप्रतिरूपका
श्च अवदत्तं अहंयुः अस्ति क्षीरा अ आ इ ई उ ऊ ऋ ए ऐ ओ औ पशुः शुकं यथा कथा
च पाट् प्याट् अंग हे है भो अये घ वि वि एकपदे युत् आतः चादिरप्याकृतिगणः सैव

इमे इमानि अनेन अन्वादेशेन उसंके एनदक्तव्यः एनत् एने एतानि एनेन एनयोः ब्रह्म ब्रह्म
ब्रह्मणी ब्रह्माणि संबुद्धौ नपुंसकानां नलोपो वा वाच्यः हे ब्रह्म हे ब्रह्मन् नरोः सुपि अहः विभाषा
ङिश्योः अहः अह्नी अहानि अह्नि अहनि अहस्सु वदांते अहोभ्याम् दंडि दंडिनी
दंडीनि सुपथि सुपथिनी सुपंथानि ऊर्क् ऊर्जौ ऊर्जी ऊर्ज्जि नरजानां संयोगः तत् ते तानि
त्ययानि एतत् एते एतानि गवाक् गवाग् गोची गवांचि पुनस्तद्वत् गवाभ्याम् शकृत् शकृती
शकृंति शकृद्भ्याम् ददत् ददती वा न उसंकसि अभ्यस्तात्परोयः शतुरवयवस्य दंतस्य नुम् वा स्या
त्सर्वनामस्थाने ददंति ददति तुदत् आच्छीनद्योर्नुम् आदंता दंगात्परोयः शतु
रवयवस्य दंतस्य नुम् वा शीनद्योः तुदन्ती तुदती तुदंति भात् भाती भांति पचत् श्यप्श्यनोर्नित्य
११८ म् शपश्यनोरात्परोयः शतुरवयवस्य दंतस्य नुम् शीनद्योः पचंती पचंति दीव्यत् दीव्यंती दीव्यंति
धनुः धनुषी सांतेति दीर्घः नुम्विसर्जनीयव्यवायेपि षः धनूंषि धनुषा धनुर्भ्याम् एवं चक्षुः हविः
पयः पयसी पयांसि पयसा पयोभ्याम् पयः सुपुम् सुपुंसी सुपुमांसि अदः विविभक्तिकार्य

उष्णिग् उष्णिहौ उष्णिहः उष्णिग्भ्याम् उष्णिक्षु द्यौः दिवौ दिवः द्युभ्याम् गीः गिरौ गिरः गीर्भ्याम् ए
वं पूः चतस्रः चतसृणाम् का के काः शेषं सर्ववत् यः सौ इदमो मः इयम् त्यदाद्यत्वम् टाप् इमे
तिमः इमे इमाः इमाम् अनया हलि लोपः आभ्याम् आभिः अस्यै अस्याः अनयोः आ
साम् अस्याम् आसु स्रक् स्रजौ स्रग्भ्याम् स्यास्ये स्याः एवं तद् यद् एतद् वाक् २० वा
ग्भ्याम् अप्शब्दो बहुवचनान्तः अप्तृन्निति दीर्घः आपः अपः अपो भि अपस्तका
भादौ प्रत्यये अद्भिः अद्भ्यः अपाम् अप्सु दिक् दिशौ दिग्भ्याम् त्यदादिषु दृशः क्विन्वि
धानादन्यत्रापि कुत्वं दृक् दृशौ दृग्भ्याम् त्विट् त्विषौ त्विषः त्विड्भ्याम् ससजुषो रुरिति रुत्वम्
सजूः सजुषौ सजूर्भ्याम् आशीः आशिषौ आशीर्भ्याम् असौ उत्वमत्वे अमू अमूः
अमुया अमूभ्याम् अमूभिः अमुष्यै अमूभ्यः अमुष्याः अमुयोः अमूषाम् अमू
षु इति हलन्ताः स्त्रीलिङ्गाः स्वमोर्लुक् दत्वम् स्वनडुत् स्वनडुही चतुरनडुहोरित्याम् स्वन
डुांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि वारा वार्भ्याम् चत्वारि किम् के कानि इदम्

तिदः विद्वद्भ्याम् पुंसोऽसुङ् सर्वनामस्थाने पुमान् हे पुमन् पुंसौ पुमांसः पुंसः पुंभ्याम् पुंसु
ऋदुशनेत्यनङ् उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशन् हे उशन
हे उशनः उशनोभ्याम् अनेहा अनेहसौ हे अनेहः वेधाः वेधसौ हे वेधः वेधोभ्याम् अदस
औ सुलोपश्च अदस औ स्यात् सौ सुलोपश्च तदोरिति सः असौ औत्वप्रतिषेधः [illegible]
[illegible] साकच्कस्य वा वक्तव्यः साकच्च असको असुकः अदसोसेर्दादु दो मः अदसोस
तस्माद् दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्यात् ह्रस्वस्य उः दीर्घस्य ऊः अमू जसः शी गुणः
एत ईद्बहुवचने अदसो दात्परस्य एत ईत् दस्य मो बहुर्थोक्तौ अमी पूर्वत्रासिद्धमिति वि
भक्ति कार्यं पश्चादुत्वमत्वे अमुम् अमू अमून् मुत्वे कृते घिसंज्ञायां नाभावः नेमुना
सो नाभावे कर्त्तव्ये अमुष्मात् अमुष्य अमुयोः २ अमीषाम् अमुष्मिन् अमीषु इति हलं
तनान्ताः पुंल्लिंगाः नहो धः झलि पदान्ते च नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ क्विबन्ते
वोना सिद्ध ३ पूर्वस्य दीर्घः उपानत् उपानद् उपानहौ उपानत्सु क्विन्नन्तत्वात् कुत्वेन घः उष्णिक्

ऽपपदे अत्यानात्पतिदृशेः कञ्चाक्विन् आ सर्वनाम्नः सर्वनाम्न आकारोऽन्तादेशः स्यात्
दृशवत्तुपरे तादृक् तादृग् तादृशौ तादृशः तादृग्भ्याम् तादृक्षु त्र्यक्तेभिः नपुंसकेऽपि विट् विड् वि
शौ विशः विड्भ्याम् विट्सु विट्त्सु नशो वा नेशेः कवर्गान्तादेशो वा पदान्ते नक् नग् नट् नड् ने
ड्भ्याम् नक्षु नट्सु नट्त्सु स्पृशोऽनुदके क्विन् अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात् घृतस्पृक् घृत
स्पृग् घृतस्पृशौ घृतस्पृशः घृतस्पृग्भ्याम् घृतस्पृक्षु दधृक् दधृग् दधृशौ दधृग्भ्याम् दधृ
क्षु रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुषः रत्नमुड्भ्याम् रत्नमुट्सु रत्नमुट्त्सु षट् षड् षड्भिः
षड्भ्यः २ षण्णाम् षट्सु रुत्वं प्रतिषेधत्वस्यापि हत्वा त्सस्सजुषो रिति रुत्वम् वोरुपधाया दीर्घ
इकः रेफवान्तस्य धातोरुपधाया इको दीर्घः पदान्ते पिपठीः पिपठिषौ पिपठिषः पिपठीर्भ्या
म् नुम्विसर्जनीयशर्व्यवायेऽपि एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्य
हुत्वेन पूर्वस्य षत्वम् पिपठीष्षु पिपठीःषु चिकीः चिकीर्षौ चिकीर्षु विद्व
न् विद्वांसौ हे विद्वन् वसोः संप्रसारणम् वस्वन्तस्य भस्य संप्रसारणं स्यात् विदुषः वसुस्रंसु

त्र आभ्यां पंचम्याः पसो ऽ तस्मत् युष्मत् अस्मत् तवममौ ऽस्य ऽतनयोर्म पर्यन्तस्य युष्मा
दस्मदोर्ङसोऽश् तवमम युवयोः आवयोः सामे आकं आभ्यां सम्माकं सते युष्माकं
अस्माकं त्वयिमयि युष्मासु अस्मासु युष्मद[illegible]स्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वा
नावौ पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वां नावौ इत्यादेशौ स्तः बहुवच
नस्य वस्नसौ उक्तविषययोरनयोः [illegible]दि बहुवचनांतयोर्वस्नसौ स्तः तेमयावेकवच
ने उक्तविषययोरनयोः षष्ठी चतुर्थ्येकवचनांतयोस्तेमे एतौ स्तः त्वामौ द्वितीयायाः उ
क्तविषययोरनयोर्द्वितीयैकवचनांतयोस्त्वामा एतौ स्तः श्रीशस्त्वावतु मापीह दत्तात्ते
मेऽपि शर्म सः स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः १ सुखं वां नौ ददात्वीशः प
तिर्वामपि नौ हरिः सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः २ एकवाक्ये यु
ष्मदस्मदादेशा वक्तव्याः एकतिङ् वाक्यं तेनेह न ओदनं पच तव भविष्यति युष्मत्
ह तस्यादेवशालीनां ते ओदनं दास्यामीति एते वां नावादयः आदेशाः अनन्वादेशे वा वक्तव्याः अन्वादेशे तु नि
त्यं बाधजनकपदस्य वाक्यं व्याकरणम् १ [illegible]त्यासुः धाता ते भक्तोऽस्ति तव [illegible]स्मीति वा तस्मै ते नमः इत्येव २ ०३

यद्यपि शेषे इति सप्तमी स्थानिनोऽधिकारात् तु विवक्षया
तेन मपर्यन्ताच्छेषस्य युष्मदस्मदो लोपः ३

उ. रस्य स्यत्र प्रथमाद्वितीययोश्चामादेशः। त्वाहौ सौ ३२९ अनयोर्मपर्यन्तस्य त्वाह इत्यादेशौ स्तः।
शेषे लोपः ३२४ ~~[illegible]~~ आत्वयत्वनिमित्ततरविभक्तौ परतो युष्मदस्मदो रन्त्य
स्य लोपः स्यात्। त्वं अहं। युवावौ द्विवचने ३२८ अनयोर्मपर्यन्तस्य युवावौ स्तो द्विभ
क्तौ। प्रथमायाश्च द्विवचने भाषायां ३२९ औङ्येतयोरात्वं लोके युवां आवां। यूयवयौ जसि
अनयोर्मपर्यन्तस्य यूयं वयं। त्वमावेकवचने एकस्योक्तावनयोर्मपर्यन्तस्य त्वमौ स्तः द्वि
तीयायां च ३२ अनयोरात्। त्वां मां। शसो न। आभ्यां शसो नः स्यात्। अचो पदादेः आदेः पर
स्य संयोगान्तस्य लोपः। युष्मान् अस्मान्। योऽचि ३२५ अनयोर्यादेशोऽनादेशेऽजादौ त
याभ्यां युष्मदस्मदोरनादेशे अनयोरात्स्यादनादेशे हलादौ। युवाभ्यां आवाभ्यां
युष्माभिः अस्माभिः। तुभ्यमह्यौ ङयि ३२७ अनयोर्मपर्यन्तस्य तुभ्य मह्य स्तः। टेर्लोपः। अभ्यम्
भ्यां परस्य युष्मभ्यं अस्मभ्यं। एकवचनस्य च ३२८ आभ्यां ङसेरत् त्वत् मत् पञ्चम्या अ

भ्यसो भ्यम् अभ्यमादेशः स्यात् आभ्यः शेषे लोपस्य ... लोप एव तत्राङः परिभाषया एकवचन

सामर्थ्यादिति वाक्यार्थबोधकाले विरोधाभावेनोपधासंनिधिकृते सामर्थ्यात्पूर्वं दीर्घप्रवृत्तिरेव कल्प्यते इति भावः ५

एतान्पेप्रत्ययः क्रुङ् क्रुञ्चौ क्रुञ्चः क्रुङ्भ्यां वर्णप्रकृतिर्पो क्रुञ्चैर्पयो वचः पयोमु
भ्यां उगित्वात् नुम् सांत महतः संयोगस्य सांत संयोगस्य महत इत्यस्य नकारस्य
धात्वादीर्घोऽसंबुद्धौ सर्वनामस्थाने महान् महांतौ महांतः हे महन् महतः महता महद्भ्या
म् अत्वसंतस्य चाधातोः अत्वंतस्य धात्वादी दीर्घो धातुभिन्नासंतस्य च संबुद्धौ सौ
इति संबुद्धौ मनवाधितात् न सामर्थ्याद्दीर्घः धीमान् धीमंतौ धीमंतः हे धीमन्
शेषादौ महद्वत् भातेर्डवतुः इति सामर्थ्यात् भस्याटिलोपः भवान् भवंतौ शत्रन्त
स्तु भवन् उगिदचां सर्वनामस्थाने धातोः इति प्रकरणे ये ते विहिते ते उगित्समुदिते अभ्यस्तसंज्ञकाः
नाभ्यस्ताच्छतुः अभ्यस्तात् शतुर्नुम् न ददत् ददतौ जक्षित्यादयः षट् षड्धातवोऽभ्य
स्तसंज्ञकाः स्युः जक्षत् जक्षतौ एवं जाग्रत् दरिद्रत् शासत् च
काशत् वेव्यत् दीध्यत् गुप्गुपू० गुपौ गुब्भ्याम् सदादिषु दृशेर्नो लोपश्चेन्ने कश्चे त्यदादि

जक्षजागृदरिद्राशास्दीधीङ्वेवीङ्चकास्तथा अभ्यस्तसंज्ञा विज्ञेया धातवो मुनिभाषिताः १